## ।। अथ त्रयस्त्रिंशोऽध्याय: ।। Chapter-33

ततो गच्छेन्नृपश्रेष्ठ सरकूपमनुत्तमं ।।
जलेन यस्य संक्लिन्ना: पाषाणा: स्फटिकोज्ज्वला: ।। १

राधौ भवन्ति हेमाभा नृणां विस्मयकारिण: ।। २

देवी खरानना तत्र नाम्ना[1] ख्याता खरानमी ।।
दर्शनाद्देवमर्त्यानाम भयं कुरुते क्षणात् ।। ३

पुराभूद्गौतमी नाम ब्राह्मणी शंसितव्रता ।।
पूर्वे वयसि सम्भूत: सुतस्तस्या विचक्षण: ।। ४

पितर्युपरते बाल्यादारभ्य स मातरम्।
सततं देवचर्यासु तीर्थ यात्रास्वनुव्रजन् ।। ५

[2]पुष्पैर्धूपैस्तुनैवेद्यै मातृभक्त्या समाहृतै: ।।
स कदाचित् वनं यात: पुष्पावचयहेतवे ।।
ब्राह्मे मुहूर्ते उत्थाय त्वरितोर्मातुराज्ञया ।। ६

पुष्पस्तबकमादातुमारुढ: पाटलाद्रुमम्।
शाखाकोटरसंस्थेन दष्ट: कालाहिना किल ।। ८

-----

१ ए मर्य
२ ए पुष्पैधूपै

विशीर्णकेशवसनः प्रकीर्णकुसुमोत्कर : ।।
निपपात महीपृष्ठे यन्त्रमुक्ताश्मवत् नृप ।। ६

तस्याथ जननी दृष्ट्वा वने बालं मृतं सुतम्।
नशोकस्यार्पयामास स्वचेतः सा पतिव्रता ।। १०

भूतानि ग्रसते कालो न कश्चित्केन रक्ष्यते ।।
इति मत्वा महाप्रज्ञा सञ्चस्कार निजं सुतम्।। ११

विधाय विधिना तस्य सा क्रियामौर्द्धदेहिकीम्।।
श्रीमालक्षेत्रे सन्यासं कृत्वा तपसि संस्थिता ।। १२

कंचित् कूपम् समासाद्य विविक्तं निर्मलोदकम्।
श्रीवृक्षपादपाकीर्णे स्थिता ब्रह्मणि निष्ठिता ।। १३

तस्यां वै तप्यमानायां खररूपेण राक्षसः ।।
पातालात्कूपमार्गेण तां विनिर्गत्य बाधते ।। १४

---

१ ख डी ई - वैचतप्य

२ ए नशोकस्या

३ ए किञ्चित्कूपं

अणुश्यामाकनीवारान् वल्कलेषु विसारितान् ।।
उत्क्षिप्य धरणीपृष्ठे कुरुते रेणुसुतान् ।। १५

कृच्छ्रेण जलसम्पूर्णान् स्थण्डिलेषु निवेशितान् ।।
प्रक्षिप्य तुण्डघातेन खण्डशः कुरुते यदा ।। १६

नित्यं सा भृशमुद्विग्ना खररूपेण रक्षसा ।।
ब्राह्मणी गौतमी राजन् खेदात् सूर्यमवैक्षत ।। १७

ततो वैवस्वती शक्तिः सद्यो मार्तण्डमण्डलात् ।।
उग्रदंष्ट्रा महाकाया प्रादुर्भूता देवी खरानना ।। १८

दोधूयमाना लांगूलं कुर्वती भैरवान् रवान् ।।
तत्रागत्याथ वेगेन गौतमीमिदमब्रवीत् ।। १६

देव्युवाच :- इयमस्मि तपोनिष्ठे न भीः कार्या कथंचन ।।
हनिष्ये राक्षसं घोरं खररूपिणमागतम् ।। २०

------

१ ग अत्र घटान् इति युक्तः स्यात् पाठ
२ ई भैरवान खान्
(ए३) तै
(ए४) द्रस्द्रा

याबदागच्छति क्रुद्धस्तावत्तिष्ठामि संवृता ।।
तवाश्रमसमीपेऽहंमध्ये श्रीवृक्षशाखिनाम्।। २१

बसिष्ठ उवाच :- एवमस्त्विति साप्रोक्ता गौतम्या पृथिवीपते ।।
श्रीवृक्षारवण्डमध्यस्था क्षणं तस्थावरिंदम ।। २२

प्रभाभिः स्वर्णतुल्याभि र्भासमाना सुरेश्वरी ।।
प्रतिमाभिरिवोद्भिक्ता मनोवृत्तिस्तपोनिधिः ।। २३

ततोऽभूदस्तशैलस्य तटालम्बी दिवाकरः ।।
व्योमाब्धिक्रमणात् श्रान्तो विश्रमेच्छुः इवाध्वगः ।। २४

गावः शान्तप्रचाराश्च गोपतेरस्तगामिनः[2] ।।
दुःसादिवपरिच्छुन्ना[3] निर्णदुश्चरमाचले ।। २५

अर्कबन्धूनि[1] पद्मानि जलसगी नि[4] सर्वतः ।।
निरस्तानि श्रिया राजन् प्रदोषेणनि[5] विरेजिरे ।। २६

---

१ ए अर्कबन्धूनि रत्र्यैव युक्त स्यात् ।

(ए २) गः

(ए ३) च्छु

(ए ४) नी

(ए ५) नि

लक्ष्मीः कमलकोशेभ्यः प्रादुर्भूता मनोहरा ।।
रात्रौ तद्रक्षणार्थाय कोकौ[1] बिभिदतुः किल ।। २७

सुप्तेषु कमलक्रोडे षट्पदेषु समंततः ।।
चकोरा मधुरं नेदुः शर्वरीगायना[2] इव ।। २८

तरुशाखान्तराणीयुर्निमीलितदृशः[3] खगाः
परित्यज्य गृहाणीव विविक्तमिव योगिनः ।। २९

आवव्रुः[4] पद्मिनी पत्रैरात्मानं मानसौकसः ।।
मुमुक्षव इवाक्षाभ्यस्तितिक्षाप्रमुखैर्गुणैः[5] ।। ३०

निसर्गमलिनैर्ध्वान्तैरावृतं परितो जगत् ।।
विषयैरिव मूर्खस्य मनो जायावशं[6] यथा ।। ३१

प्रवृत्ता रजनी राजन्नथ ध्वान्तमयाम्बरा ।।
असतीव प्रमोदाय परितः पापचेतसाम् ।। ३२

----

१ ए काकीश्च कोकीश्चेति द्वन्द्वे एक शेषः ।
१ बी ई कोकौ
२ ई बी शर्वरीगायना इव, शर्वरी गायका इव इति पाठः युक्त स्यात्
४ बी आवव्रुः
५ बी ई इवाक्षाद्व्यास्तितक्षा प्रमुखै
६ बी ई मनो यायावरं । मनोजावशं यथा । अत्र मनोजा रतिस्तस्या अथवा मनसो जाया तस्या वशमितितत्पुरुषेण साधु

---

(ए १) काकौ (ए ३) निर्मीलितदृशः

ततः कर्णकठोरोऽभूत् पूर्वमुच्चैः खरस्वरः[1] ।।
पश्चात्[2] कूपतयत् प्राप्तं रक्षः खरमुखं बहिः ।। ३३

वित्रस्तास्तस्य शब्देन पादपाश्रयिणः खगाः ।।
स्खलिता वृक्षशाखाभिरधः पेतुर्महीतले[3] ।। ३४

मनो[4] ध्यानमयीभूतं परे पुंसि तपोनिधेः ।।
गौतम्याः खगविक्रोशैप्रर्वर्त्तत पुनर्नृपः ।। ३५

ददर्श[5] पुरतस्तावत् पदाघातेन पादपान् ।।
उन्मूलयन् महाघोरो राक्षसः खररूपधृक् ।। ३६

उच्चैरथ जगादेति ब्राह्मणी गौतमी शुभा ।।
जगतां मातुराव्हानं कुर्वती व्यपदेशतः ।। ३७

गौतम्युवाच :- दूरं[6] याहि दुराचार मापराक्षा स्तपस्विनाम् ।।
कालरात्रिमिथ्यां प्राप्तामात्मनः किं न बुध्यसे ।। ३८

----

१ बी खरः स्वरः ई खरसर स्वरः
(ए १) पश्चा (ए २) महितले (ए ४) भूत
(ए ५) ददर्श (ए ६) दूरं

वसिष्ठ उवाच :- इत्याकर्ण्य वचो राजन् शक्तिर्वैवस्वती तदा ।।
पर्यधावन् महादंष्ट्रा कुर्वती भैरवान् रवान् ।। ३९

ततस्तेनैव नादेन राक्षसः प्राप्तसाध्वसः ।।
न शशाक (A1) महीपाल सस्थातुं न पलायितुम् ।। ४०

वेगादथ पदन्यासैर्नमयन्ती महीं नृप ।।
जग्राह राक्षसं कण्ठे यथा सिंहवधूर्मृगम् (A2) ।। ४१

दन्तैः कुलिशकल्पैस्तैर्देवी विश्वार्तिहारिणी ।।
तस्य क्रोशमानस्य निचकर्त शिरो महत् ।। ४२

ततः स्वरूपमास्थायच्छिन्नशीर्षो निशाचर : ।।
निपपात (A3) महीपृष्ठे वज्राहत इवाचलः ।। ४३

अथ तं पतितं वीक्ष्य गतसत्वमचैतनम् (B1) ।।
राक्षसं (A4) क्रूरकर्माणं गौतमी मुदिताऽब्रवीत् ।। ४४

----

१ बी गतसत्वमचैतसम ई गतसगतसत्वरैम
(ए२) मृग (ए १) महीपाल (ए ३) महिपृष्ठे
(ए४) क्रूर

गौतम्युवाच :- विश्वमातर्नमस्तेऽस्तु नमस्ते तिग्मतेजसे ।।
नमस्ते विश्वरूपिण्यै छन्दसां निधये नम: ।। ४५

परस्तात्तमसो मातस्तव रूपं हि भासुरम्।
मुक्त्यै नाम्ना यदन्योऽस्ति तस्यै सावित्रि ते नम: ।। ४६

देव्युवाच :- अनेनज्ञानवैश्यैनतवतुष्टात तपश्विनि ।।
वरं वरय कल्याणि न मोघं दैवदर्शन ।। ४७

गौतम्युवाच :- मुमुक्षोर्मम केनापि नास्ति कामप्रयोजनम्।
स्थितिरत्रास्तु ते नित्यं यदि मोघं न दर्शनम्।। ४८

देव्यु वाच :- रूपेणाहमनेनैव स्थास्याम्यत्र तपस्विनि ।।
वाञ्छितानि प्र-दास्यामि मर्त्येभ्य: पूजिता स्तुता ।। ४९

अत्र स्नानं करिष्यन्ति सरकूपे समाहिता : ।।
ते प्रयास्यन्ति निर्धूय पापानि परमं पदम्।। ५०

श्लोक

१ ए तपश्विनि

दम्पतीभ्यां महाभक्त्या यो वस्त्राणि प्रदास्यति ।।
तस्य गौतमि तुष्टाहं दास्यामि मनसेप्सितान् ।। ५१

प्राप्स्यसि त्वं तु सायुज्यं मया सह न संशय : ।।
आभूतसम्प्लवं यावदन्ते देहे स्य गौतमि ।। ५२

बसिष्ठ उवाच :- (श्री।) इत्युक्त्वान्तर्दधे देवी सावित्री सहसा नृप ।।
गौतम्यपि चिरं तप्त्वा प्रतिष्ठाप्य खराननाम् ।। ५३

देहत्यागे महीपाल परं ब्रह्मपदं ययौ ।। ५४

इति श्री निर्मिते क्षेत्रे प्रादुर्भूता खरानना ।।
श्रुत्वा कथामिमां रम्यां न मर्त्यो दुःखमाप्नुयात् ।। ५५

-०-

इतिश्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्मविभागे तृतीय परिच्छेदे श्रीमालमाहात्म्ये खराननामा-माहात्म्यं नाम त्रयस्त्रिंशोऽध्याय: ।। ३३ ।।

( ए) एका